अङ्क-२८
जुलाई-दिसम्बर २०१६

वेदविद्या
ISSN-2230-8962

# यज्ञस्वरूपविमर्शः

**रङ्गनाथत्रिपाठी**

**"वेदा हि यज्ञार्थमभिप्रवृत्ताः"**[१] वेदाङ्गज्योतिषे लगधमुनिना प्रोक्तेन श्लोकांशेनानेन यज्ञार्थमेव वेदानामुत्पत्तिः सिध्यति। यज्ञपुरुषः परमात्मा यज्ञकर्मप्रचाराय संसारसर्जनाय च सर्वप्रथमं यजनमकरोत्। यद्यपि यज्ञयागादीनां विवेचनं तत्सम्बन्धिवाक्यानाञ्च विश्लेषणमिति मीमांसायाः मतेऽत्र द्विधा सिद्धान्ताः प्रतिपादिताः।

**मीमांसाशास्त्रम्**

**कर्मकाण्डसिद्धान्तः** | **दार्शनिकसिद्धान्तः**

अत्र तावत् कर्मकाण्डसिद्धान्तो विचार्यते। 'यज्ञ' शब्दो 'यज्' धातुना निष्पद्यते। 'यज्' धातुः त्रिषु अर्थेषु विद्यते यथा-देवपूजा, सङ्गतिकरणम्, दानमिति। देवशब्दोऽपि प्राणिमात्रस्य कल्याणोपयोगी देवपूजा। सङ्गतिकरणस्य तात्पर्यं केषाञ्चित् पदार्थानां यथोचितं संयोगो येन प्राणिनां कल्याणमुत्कर्षश्च भवेत्। विदुषां वा सत्सङ्गः सङ्गतिकरणम्। दानस्यार्थः स्वयमुपार्जितधनसम्पत्ति-विद्यादीनां प्राणिमात्रस्य कल्याणाय प्रयुक्तिः। एवं यज्ञशब्दस्य क्षेत्रमतीव विस्तृतम्। यज् धातोः अर्थव्यापकतां दृष्ट्वैव गीतायाः चतुर्थेऽध्याये द्रव्ययज्ञः, तपोयज्ञः, योगयज्ञः, स्वाध्याययज्ञः, ज्ञानयज्ञ इत्यनेकविधानां यज्ञभेदानां निरूपणं कृतम्। यथोक्तम्-

**द्रव्ययज्ञास्तपोयज्ञाः योगयज्ञास्तथापरे।**
**स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः।।**[२]

मीमांसाशास्त्रं द्रव्ययज्ञं विवेचयति। कात्यायनश्रौतसूत्रे लक्षणं कृतम्- **'द्रव्यं देवता त्यागः'**[३]। अत्र द्रव्यं देवता त्यागः इति त्रयाणां संयोग एव यज्ञं। यतः अस्यार्थः क्रियते देवोद्देश्येन द्रव्यस्य त्यागो यज्ञः। यो हि यज्ञः केनचित् द्रव्येण क्रियते स हि द्रव्ययज्ञः। किन्तु यज्ञपरिभाषायां त्यागस्थानविशिष्टस्य अनिर्देशत्वाद् द्रव्यत्याग इत्येव यज्ञस्य तात्पर्यं बोधितव्यम्।

---

[१] आर्षज्यौतिषे ३६
[२] श्रीमद्भगवद्गीता ४/२८
[३] कात्यायनश्रौतसूत्रम् १/२/२

यज्ञाः श्रौतस्मार्तभेदेन द्विधा विभक्तः। येषां विधानं संहितासु ब्राह्मणेषु वा केनचित् वाक्येन भवति ते श्रौतयज्ञाः कथ्यन्ते। येषां विधानं गृह्यसूत्रेषु वा धर्मसूत्रेषु प्राप्यते ते हि स्मार्तयज्ञाः बोध्यन्ते।

**यज्ञाः**

**श्रौतयज्ञाः** **स्मार्तयज्ञाः**

द्वयोर्विरोधे तु श्रुतिरेव प्रमाणम्। यथा हि जैमिनिना प्रोक्तम्- 'विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम्'[४]। ते हि यज्ञाः नित्यनैमित्तिककाम्यभेदेन त्रिविधाः भवन्ति। नित्ययज्ञाः ते भवन्ति येषां यथाकालं नियमतः कर्तुं विधानमस्ति। अग्निहोत्रं, दर्शपूर्णमासः, चातुर्मास्यं, सोमयज्ञाश्चेति नित्ययज्ञाः मन्यन्ते। महाभारतस्य शान्तिपर्वणि अग्निहोत्रं, दर्शपूर्णमासः, चातुर्मास्यमित्येते सनातनयज्ञाः कथ्यन्ते;-

**"दर्शं च पौर्णमासं च अग्निहोत्रं च धीमतः।**
**चातुर्मास्यानि चैवासन् तेषु धर्मः सनातनः।।"**[५]

नैमित्तिकयज्ञाः ते भवन्ति ये गृहादिदाहे भूकम्पे अतिवृष्टौ च निमित्ते क्रियन्ते। इत्थं विविधकामानां कृते अनेकेषां यज्ञानां विधानं वेदशाखासु, ब्राह्मणेषु, श्रौतसूत्रेषु, गृह्यसूत्रेषु, धर्मसूत्रेषु च क्रियते। मुण्डकोपनिषदि प्रोक्तं यज्ञानां त्रेतायुगे विस्तृतिः अभूत्- **'तानि त्रेतायां बहुधा सन्ततानि'।**[६] एतेषां त्रयाणामपि श्रौतयज्ञानां पुनः त्रयो भेदाः यज्ञीयपदार्थभेदत्वाद् भवन्ति।

**यज्ञः**

**पाकयज्ञः** **सोमयज्ञः** **हविर्यज्ञः**

पाकयज्ञास्ते येषां द्रव्याः मानवस्य भोज्यपदार्थाः। यथा- यवः, व्रीहिः, तिलं, गोधूमः, घृतं, दुग्धं, दधीत्यादीनि। येषु द्रव्यत्वेन सोमः प्रयुज्यते ते सोमयज्ञाः।

येषां द्रव्येण हविर्भवति ते हविर्यज्ञाः। एतेषां त्रयाणामपि पाक-सोम-हविर्यज्ञानां सप्त-सप्त भेदाः भवन्ति। यथोक्तम्-

**"सप्त सुत्याः सप्त च पाकयज्ञाः हविर्यज्ञाः सप्त तथैकविंशतिः।**
**सर्वे च यज्ञा आङ्गिरसोऽपि यान्ति नूतना यानृषयो सृजन्ति च सृष्टाः पुराणैः।।"**[७]

---

[४] मीमांसासूत्रम् १/३/२
[५] महाभारतम्(शान्तिपर्व) २६९/२०
[६] मुण्डकोपनिषद् १/२/१
[७] गोपथब्राह्मणम् १/५/२५

एतेषु सप्त पाकयज्ञानां सम्बन्धः गृह्यसूत्रैः सह वर्तते। अत एते पाकयज्ञा अपि कथ्यन्ते। अन्येषाञ्च सप्तहविर्यज्ञानां सप्तसोमयज्ञानाञ्च सम्बन्धः मन्त्रैः, ब्राह्मणैः वा श्रौतसूत्रैः सह वर्तते, अत एते श्रौतयज्ञाः। कात्यायनश्रौतसूत्रे त्रयोविंशतियज्ञानां वर्णनं प्राप्यते। तच्च -

| | | |
|---|---|---|
| १.अग्न्याधानम्, | २.अग्निहोत्रम्, | ३.दर्शपौर्णमासः, |
| ४.दाक्षायणयज्ञः, | ५.आग्रायणेष्टिः, | ६.मित्रविन्देष्टिः, |
| ७.चातुर्मास्यम्, | ८.निरूढपशुबन्धः, | ९.सोमयागः, |
| १०.एकाहः, | ११.द्वादशाहः, | १२.सत्रम्, |
| १३.गवामयनम्, | १४.वाजपेयः, | १५.राजसूयः, |
| १६.अग्निचयनम्, | १७.सौत्रामणिः, | १८.अश्वमेधः, |
| १९.पुरुषमेधः, | २०अभिचारयागः, | २१.अहीनातिरात्रम्, |
| २२.सत्रम् (सहस्रसंवत्सरान्तम्), | | २३.प्रवर्ग्यः। |

एते सर्वेऽपि श्रौतयज्ञाः प्रक्रियादृष्ट्या त्रिषु वर्गेषु विभक्ताः- प्रकृतियज्ञाः, विकृतियज्ञाः, प्रकृतिविकृतियज्ञाश्च।

**श्रौतयज्ञाः**

**प्रकृतियज्ञाः** **विकृतियज्ञाः** **प्रकृतिविकृतियज्ञाः**

यत्र कृत्स्नं क्रियाकलापमुच्यते सा प्रकृतिः वा यतो विकृतिरङ्गानि गृह्णाति सा प्रकृतिः; यथा दर्शपौर्णमासयागः। प्रकृतिवद् विकृतिः कर्त्तव्येति विकृतियागः; यथा- दाक्षायणेष्टिः। यत्र कानिचिदङ्गानि प्रोक्तानि कानिचिच्च प्रकृतियागेभ्यो गृह्णाति सः प्रकृतिविकृतियागः। यथा- चातुर्मास्यस्य वैश्वदेवपर्व।

वेदशाखासु, ब्राह्मणेषु, श्रौतसूत्रेषु च स्वतन्त्ररूपेण यज्ञानाञ्चावयवरूपेण पशुयज्ञानां बहुधा समुल्लेखः प्राप्यते। ऐतरेयब्राह्मणे शतपथब्राह्मणे च पुरुष-अश्व-गो-अवि-अजपशूनां निर्देशः प्राप्यते----

**स (अग्निः) एतान् पञ्च पशून् अपश्यत्।**
**पुरुषमश्वं गामविमजं यदपश्यत्तस्मादेते पशवः॥**[८]

एते पञ्च प्रसिद्धाः पशुयागाः सन्ति। अत्र चिन्त्यमिदं यत् किमेते पशवः लौकिकाः उत वा यज्ञेषु केषाञ्चित् प्रतीकभूताः। अत्र एते पशुयागाः विचार्यन्ते।

**'क' पुरुषमेधः -** शुक्लयजुर्वेदस्य त्रिंशत्तमः एकत्रिंशत्तमश्चाध्यायौ पुरुषमेधे विनियुक्तौ स्तः। श्रौतसूत्रेषु ब्राह्मणेषु च १८४ पुरुषपशूनां यूपबन्धनं निर्दिष्टमस्ति। यूपे निबद्धानां १८४ पुरुषपशूनां ब्रह्मा

---

[८] शतपथब्राह्मणम् ६/२/१/२ (अच्युतग्रन्थमाला, वाराणसी)

पुरुषसूक्तेन[९] स्तुतिं विधाय उत्सृजति यथा अश्वमेधेन कपिञ्जलादय आरण्यकाः पशुपक्षिणः उत्सृज्यन्ते। उक्तमपि कात्यायनश्रौतसूत्रे-

**"नियुक्तान् ब्रह्माऽभिष्टौति होतृवदनुवाकेन सहस्रशीर्षेति।**
**कपिञ्जलादिवदुत्सृजन्ति ब्राह्मणादीन् ॥"**[१०]

ब्राह्मणादिपुरुषाणम् उत्सर्गात् परं यस्य पुरुषस्य या देवता, तस्यै सकृद्गृहीताज्येन ब्रह्मणे स्वाहा, क्षत्राय स्वाहा प्रभृतिमन्त्रैः आहुतयः प्रदीयन्ते। ताभिश्चाहुतिभिः स्वदेवताः प्रीणन्ति। यथोक्तं शतपथब्राह्मणे -

**'तान्पर्य्यग्निकृतानेवोदसृजत्तद्देवत्या आहुतीरजुहोत्ताभिस्ता देवता अप्रीणात्ता एनम्प्रीता अप्रीणन्त्सर्व्वैः कामैः।'**[११]

पुरुषमेधस्य प्रयोजनं कात्यायनश्रौतसूत्रे लिखितम् **"पुरुषमेधस्त्रयोविंशतिदीक्षोऽतिष्ठाकामस्य।"**[१२] पुरुषमेधशब्दस्य निर्वचनं शतपथब्राह्मणे कृतमस्ति।

पुरुषमेधे न पुरुषाणां हिंसा भवति प्रत्युत यागानन्तरम् उत्सृज्यन्ते। शतपथब्राह्मणे पुरुषमेधप्रकरणारम्भे पुरुषमेधस्य आधिदैविकं आध्यात्मिकञ्च स्वरूपं तदनु यज्ञप्रक्रिया निरूपिता। अतः पुरुषमेधस्य तात्पर्यम् आधिदैविकजगति आध्यात्मिकजगति च वर्तते।

**'ख' अश्वमेधः** - अधुना अश्वमेधो विचार्यते। अश्वमेधः आधिदैविकजगति कस्यचिद्यज्ञस्य प्रतिरूपकम्। आधिदैविकजगति अश्वमेधे सूर्य एव सार्वभौमो राजा स एव अश्वः। ऋग्वेदे अश्वमेधसम्बन्धिसूक्तेषु प्रमाणीभवति।[१३] अश्वरशनायाः परिणामः १२ वा १३ अरत्निः। सूर्यस्य परिक्रमायां द्वादशमासाः, अधिकमासत्वात् कदाचित् त्रयोदशमासा अपि भवन्ति। राज्ञः चतस्रः भार्याः पूर्वपश्चिमोत्तरदक्षिणाः दिशः। पूर्वदिशा महिषी। पश्चिमदिशा वल्लभा। दक्षिणदिशा अवल्लभा। उत्तरदिशा दूतपुत्री। सूर्यस्योत्तरायणे दक्षिणायने च एव संयोगः न तु सर्वदा। अश्वस्य वर्षं यावत् परिभ्रमणं सूर्यस्य वार्षिकगतेः उपलक्षणम्। अश्वस्य रक्षायै चतुश्शतं शस्त्रास्त्रसम्पन्नाः राजपुत्रादयः प्रेष्यन्ते। ते सूर्यस्य किरणानां निदर्शकाः। यथोक्तं ऋग्वेदे,[१४] वायुपुराणे[१५] मत्स्यपुराणे[१६] च।

---

[९] शुक्लयजुर्वेदः ३१/१-१६
[१०] कात्यायनश्रौतसूत्रम् २१/१/११-१२
[११] शतपथब्राह्मणम् १३/६/२/१३
[१२] कात्यायनश्रौतसूत्रम् २१/१/१
[१३] ऋग्वेदः १/१६२,१६३,१६४
[१४] ऋग्वेदः १/४६/१८, १/३५/६ सूक्तानि
[१५] वायुपुराणे ५३/१९-२३
[१६] मत्स्यपुराणे १२८/१८-२२

द्रव्ययज्ञरूपस्य अश्वमेधस्य सम्बन्धः सृष्टियज्ञस्य अश्वमेधेन सह वर्तते। व्याख्यानमस्य शतपथब्राह्मणे तैत्तिरीयब्राह्मणे च विस्तरेण प्राप्यते।

**'ग' गोमेधः** - यथा पुरुषमेधस्य अश्वमेधस्य च याज्ञिकग्रन्थेषु नामनिर्देशः प्राप्यते तथा गोमेधस्य साक्षात् निर्देशो नास्ति। एकं गवामयननामकं संवत्सरसाध्यं सत्रं विहितमस्ति। ऐतरेयब्राह्मणेऽपि गवामयनसत्रस्य विधानं प्राप्यते-[१७]

**'गवामयनेन यन्ति। गावो वा आदित्याः। आदित्यानामेव तदयनेन यन्ति। गावो वै सत्रमासत।'**

सत्रेऽस्मिन् गावो वै आदित्याः। आदित्यस्य एकत्वेऽपि कालभेदेन कर्मभेदेन च द्वादशभेदाः भवन्ति। आदित्यानां गतिः गवामयनम्। आदित्यानां दक्षिणायनमुत्तरायणञ्च लोकप्रसिद्धमेव। अतः गवामयनसत्रम् आधिदैविकम्।

**'घ' अविमेधः** - अविमेधनामकः स्वतन्त्रो यागो नास्ति। यत्र तत्र वर्णनं प्राप्यते। अविमेधस्य प्रसङ्गः शतपथब्राह्मणे[१८] कात्यायनश्रौतसूत्रे[१९] च प्राप्यते। यत्र चातुर्मास्यस्य वरुणप्रघाससञ्ज्ञके द्वितीये पर्वणि निस्तुषयवस्य पिष्टेन मेषमेषीनिर्माणमादिश्यते। अविः पृथिवीवाचकः शब्दः। लोके च पशुवाचकः शब्दः। तैत्तिरीयसंहितायां[२०] प्रतिपादितम्। यजुर्वेदेऽप्यस्य वर्णनं प्राप्यते। **अविरासीत्पिलिप्पिला।**[२१] सा अवस्था ऊर्णायुः। यतोहि तस्यामवस्थायाम् ऊर्णरूपाः लोमा एव उत्पन्ना आसन्।

**'ङ' अजामेधः** - अजामेधोऽपि कश्चन स्वतन्त्रो यागो नास्ति। ब्राह्मणग्रन्थानुसारेण समस्तपशुयागानां प्रकृतिः सोमयागस्थ अग्निषोमीयः पशुयागः। श्रौतसूत्रानुसारेण निरूढपशुबन्धः पशुयागानां प्रकृतिः। अग्निषोमीयपशुयागस्य प्रकृतिः दर्शेष्टिः सान्नाययागः तत्रापि पशुयागः प्रकृतिः। अजाशब्दस्य व्युत्पत्तिभेदेन अर्थद्वयं प्रभवति। प्रथमस्तु- अजति सातत्येन गच्छति इत्यजः। द्वितीयः- न जायते इत्यजः। यथा- आत्मा परमात्मा प्रकृतिः। अजशब्दः उक्तेष्वर्थेषु वैदिकवाङ्मये बहुधा प्रयुज्यते। द्वावपि अजशब्दौ अन्तोदात्तावेव।

द्रव्ययज्ञानां कल्पना कथमभवदिति सर्वेषामेव मतिमतां स्वाभाविकः प्रश्नः। सृष्ट्यादौ सत्त्वगुणविशिष्टस्य योगशक्तिसम्पन्नाः परावरज्ञाः ऋषयः स्वदिव्यमानसिकशक्त्या चराचरमिदं जगत् अपरमाणु परममहत्तत्त्वपर्यन्तं सर्वमपि पदार्थं प्रत्यक्षीकुर्वन्ति स्म। न किमपि अप्रत्यक्षमासीत्तेषां कृते- **'साक्षात्कृतधर्माणः ऋषयो बभूवुः।'**[२२] उत्तरोत्तरं सत्त्वगुणन्यूनता रजोगुणतमोगुणाभिवृद्धिकारणात्

[१७] ऐतरेयब्राह्मणम् ४/१७

[१८] शतपथब्राह्मणम् ५/५/२-१५,१६

[१९] कात्यायनश्रौतसूत्रम् ५/३/७, ५/५/२-३

[२०] तैत्तिरीयसंहिता २/१/२/३

[२१] शुक्लयजुर्वेदः २३/१२

[२२] निरुक्तम् १/२०

काम-क्रोध-लोभ-मोहादयः उत्पन्नाः। यथोक्तं बृहत्संहितायाम्- **"तेषां क्रमादपचीयमानसत्त्वानाम् अपचीयमानरजस्तमस्कानां तेजोऽन्तर्दधे।"** ततः ते प्राजापत्यान् शाश्वतान् नियमान् अतिक्रामन्ति स्म।

तदानीं साक्षात्कृतधर्माः परावरज्ञः ऋषयः ब्रह्माण्डस्य अध्यात्मस्य च ज्ञानं कारयितुम् आधिदैविकम् आध्यात्मिकञ्च वेदार्थं संरक्षितुं यज्ञमयानि रूपकाणि परिकल्पितवन्तः। यज्ञस्य परमं प्रयोजनं दैवतस्याध्यात्मस्य च ज्ञानमासीत्। निरुक्ते उक्तमपि- **'याज्ञदैवते पुष्पफले देवताध्यात्मे वा।'**[२३] अतः ब्रह्माण्डस्य पिण्डस्य च सूक्ष्मं परिज्ञानार्थमेव यज्ञपरिकल्पना प्रस्तुता।

**रङ्गनाथत्रिपाठी**
प्राध्यापकः, वेदविभागस्य
श्रीगोरक्षनाथसंस्कृतविद्यापीठम्
गोरखनाथमन्दिरम्, गोरखपुरम्

[२३] निरुक्तम् १/१९